## ( २ )     भव त्वम् ( सन्नन्तप्रातिपदिकशिक्षणम् )

यियक्षुः याजकः याति यज्ञशालां शुचिस्मितः ।
पिपासुः विहगः शीघ्रं शीघ्रं याति नदीतटम् ॥

जिगमिषुः पथं पान्थः पृच्छति ग्रामवासिनम् ।
युयुत्सुः सैनिकः शस्त्रं गृह्णाति रक्षितुं रणे ॥



शुश्रूषुः पुत्रकः स्नेहात् पितरौ ननु सर्वदा ।
विवक्षुः वर्तते वक्ता सभायां वादपण्डितः ॥

पिपठिषुस्सदा शिष्यः परीक्षासमये भवेत् ।
निनर्तिषुः गतः मञ्चे नर्तकः निपुणः सुधीः ॥

पिपक्षुः पाचकः याति शीघ्रं शीघ्रं महानसम् ।
तित्यक्षुः याति संन्यासी संसारं गहनं वनम् ॥

पिपर्णिषुः सदा देवं भक्तिं करोति सज्जनः ।
जिगीषुः भव हे बाल! शक्त्या ज्ञानेन सर्वदा ॥

धातुओं के अर्थ -

यियक्षुः - यज्ञ करने की इच्छावाला
पिपासुः - पीने की इच्छावाला
युयुत्सुः - लड़ने की इच्छावाला
विवक्षुः - बोलने की इच्छावाला
पिपठिषुः - पढ़ने की इच्छावाला
निनर्तिषुः - नृत्य करने की इच्छावाला
पिपक्षुः - रसोई बनाने की या पकाने की इच्छावाला
तित्यक्षुः - त्यजने की इच्छावाला
पिपर्णिषुः - प्रसन्न करने की इच्छावाला

## ( ३ ) स्वादिधातु शिक्षणम् [ अनुष्टुप ]

सुनोति ब्राह्मणः सोमं, सुनोति बालकः जले ।
आप्नोति श्रमिकः द्रव्यं, धूनोति पवनः लताम् ॥

चिनोति पथिकः मार्गं, भित्तिं स्तृणोति वल्लरी ।
आप्नोमि पठनाद् विद्यां, शक्नोषि तरितुं नदीम् ॥

चिनुमः सरितः शङ्खान्, वृणोति युवती पतिम् ।
वृण्वन्ति सैनिकाः युद्धं, वृण्वन्ति योगिनः वनम् ॥

शक्नुमः साहसं कर्तुं, गन्तुं शक्नुथ पर्वतम् ।
खगाः चेष्यन्ति क्षेत्रेषु प्रातः धान्यकणान् ननु ॥



चिन्वन्तु बालकाः सर्वे पुष्पाणि रम्यकानने ।
इक्षुदण्डात् रसं केचित्, सुन्वन्ति च पिबन्ति च॥

वृणुमः केवलं विद्यां, वृण्वन्ति लुब्धकाः धनम् ।
शक्नुयुः लीलया ज्ञानं लब्धुं काव्येन पण्डिताः ॥

धातुओं के अर्थ -

सु - निचोड़ना, स्नान करना
आप् - प्राप्त करना
धूञ् - हिलाना
चिञ् - चुनना
स्तृञ् - ढाँकना
वृ - वृणोति - वरण करना

## (४)        शुभा विद्या

ज्ञानिना दीयते ज्ञानं हस्तिना धार्यते मदः ।
केकिना क्रियते केका, दानिना दीयते धनम् ॥



मानिना रक्ष्यते मानः, शशिना दीप्यते निशा ।
वाजिना नीयते राजा, गुणिना प्राप्यते यशः ॥

धनिना लभ्यते द्रव्यं, सुखिना दृप्यते* वृथा ।
मन्त्रिणा बोध्यते स्वामी, पक्षिणा दृश्यते नभः ॥

बलिना जीयते शत्रुः, शिखिना भूष्यते वनम् ।
योगिना सिध्यते योगः, शृङ्गिणा पीड्यते जनः ॥

चक्रिणा क्षिप्यते चक्रं, रथिना नीयते रथः ।
विद्यार्थिना शुभा विद्या प्राप्यते गुरुसन्निधौ ॥

[ अत्र इन् प्रत्ययान्त प्रातिपदिकानां कर्मणिप्रयोगस्य शिक्षणं वर्तते । ]

*( दृप् - गर्व करना )

# शिशु-शयन-गीतिका ( लोरी )

-डॉ. युवराजः भट्टराई*

सान्ध्यवेला गता चागता रे निशा,
चाम्बरे शोभते सा निशानायिका।
स्वप्नलोके प्रयातुं सुते! तल्पके,
गच्छ गीतिं सुतायै प्रगायामि ते ॥१॥



गायन्नस्मीह कन्ये! त्वदीयं प्रियं,
वेद्मि सङ्गीतकं भाति ते मञ्जुलम्।
विष्टरे पेशले गच्छ रे पुत्रिके!
श्रूयतां स्वप्नगीतिं प्रगायामि ते ॥२॥

अंशुमाली च कृत्वा स्वलीलां गतः,
जायते चान्धकारः सुते! सर्वतः।
शान्तिदे स्वप्नलोके गताः ते जनाः,
त्वं किमर्थञ्च कन्येऽसि क्रीडारता ॥३॥

मेघमालासु विद्योतते सा तडित्,
गर्जना तर्जना जायते भीतिदा।
वृष्टिधारा पतेन्नो क्वचित् तल्पके,
द्वारवातायनौ द्वौ पिनद्धौ यतः ॥४॥

भुक्तपीतासि सम्यक् यतः कूर्द्यते,
शेष्व मुग्धे! निशीथेऽपि हा! क्रीड्यते।
स्वप्नगीतं निशम्यापि किञ्चेहसे?
सुप्यतां स्वप्नगीतिः मया श्राव्यते ॥५॥

---

*२१, प्रथम-तलम्, विथि सं.-५, प्रेम विहारः, नगली डेयरी, नजफगढ़म्, नवदेहली-११००४३

नैव रात्रौ विहारः शुभे! शोभते,
प्रातरुत्थाय क्रीडां कुरुष्व प्रिये!
सज्जिता ते सुशय्या न वा दृश्यते?,
चापलं त्यज्यतां सुप्यतां कोमले! ॥६॥



स्वप्नलोके मनोज्ञाऽप्सरा दृश्यते,
लाल्यसे त्वं च लोकोत्तरे नीयसे।
स्वप्नमध्ये तया नृत्यते गीयते,
शेष्व शीघ्रं सुते! क्रीडनं संहरेः ॥७॥

स्वप्नगा साऽप्सरा त्वां शुभां सेवते,
रोचकं कर्णरन्ध्रे शुभं गीयते।
दृष्टिपातेन तस्या व्यथा नश्यते,
चित्रयामीह किं शेष्व तल्लभ्यते ॥८॥

पुष्पपात्रे सुपेयो रसो दीयते,
सानुरागं तथा गीतकं गीयते।
हस्तसंस्पर्शनेन त्वयि प्रीयते,
सुप्यतां दृश्यमेतत्तदा दृश्यते ॥९॥

व्योम्नि सिन्धौ तरौ वा मरौ वा गिरौ,
भानुभामण्डले नाकलोके विधौ।
देवनार्या स्वयं लीलया नीयते,
लोकितुं सर्वमेतत् सुते शेष्व हे! ॥१०॥

अन्धकारे जगत् स्वप्नके लीयते,
पश्य शेतेऽनुजस्तत्र खट्वां निजे।
सर्वलोकाः स्वपन्तीह रात्रौ गृहे,
तारकाश्चाम्बरे भान्ति ते प्रीणने ॥११॥

वाटिकायां वने वृक्षगुल्माः समे,
चन्द्रिकाशीतले वै तले शेरते।



स्थातुमग्रे न शक्नोमि खेलाकृते,
नेत्रमार्गेण निद्रा नु मां बाधते। ॥१२॥

बालकल्लोल-खेला निशीथे न स्यात्,
क्रीड हे! त्वं प्रभाते सखीभिः समम्।
स्वप्नबेला प्रयाता सुते! श्रूयताम्,
राक्षसी याति मार्गे सुते! सुप्यताम्। ॥१३॥



# नियतिः एव बलीयसी

-डॉ. सौ. शारदा-रमेश-गाडगे*

माधवः उद्याने खिन्नमनाः उपविष्टः आसीत्। तस्य मनः विविधविचारैः चिन्ताभिः च व्याप्तम् आसीत्। कुत्रापि तस्य मनः नारमत। अस्यामेव अवस्थायां तस्य दृष्टिः पुरतः स्थितं वृक्षं प्रति गता। तत्र काचित् चटका नीडं रचयती आसीत्। चटकः तस्याः साहाय्ये निमग्नः आसीत्। तयोः प्रेम, सहकार्यं, प्रयत्नान् च दृष्ट्वा क्षणार्धेनैव तस्य मनः भूतकाले प्रविष्टम्। स्वप्नवत् अमन्यत सः स्वजीवनम्।

कियान् सुखी आसीत् माधवः अद्ययावत्। विद्यापीठस्य स्नातकोपाधिम् अधिगम्य अचिरादेव सः शासकीय कार्यालये वृत्तिमपि प्राप्तवान्। सः आत्मानं धन्यममन्यत। परिश्रमशीलत्वात् सेवाभावात् च अल्पेनैव कालेन सः सर्वेषां कण्ठमणिः अभवत्। तस्य वृद्धा माता स्नुषायाः मुखं द्रष्टुम् अतीव उत्सुका आसीत्। तस्याः इच्छामनुसृत्य परिचितपूर्वया अनुरूपकन्यया मालत्या सह सः विवाहबद्धः।

विवाहमङ्गलेन माधवस्य जीवने नूनं नूतनपर्वमारब्धम्। साक्षात् वसन्तः अवतीर्णः तस्य गृहे। मालती रूपवती, गुणवती, शीलवती, पतिपरायणा चासीत्। तस्याः सहवासे सः महाकवेः कालिदासस्य **'गृहिणी सचिवः सखीमिथः प्रियशिष्या ललिते कलाविधौ'** इत्येनां काव्यपङ्क्तिम् अस्मरत्। मालती अतीव आनन्दिता सोत्साहा चासीत्। तस्याः मनसि कदापि असन्तोषः नासीत्। तया सह माधवः चटकदम्पतीवत् नूनं तु एकैकं तृणलवं संगृह्य सुन्दरं गृहं रचितवान्। अस्मिन् आनन्दपर्वणि मधुलिकायाः मिलिन्दस्य च आगमनेन तयोः आनन्दः शतगुणितः। शिशुद्वयस्य पादन्यासैः मधुरशब्दैः च गृहं पूरितम्। 'एष एव मम स्वर्गः' इति सः कृतार्थेन मनसा अवदत्। नासीत् किमपि न्यूनं तस्य जीवने। मालती सर्वाणि गृहकार्याणि स्वयमेव अकरोत्। माधवः प्रतिमासं सम्पूर्णं वेतनं तस्याः हस्ते न्यवेशयत्। विचारपूर्वकं योजनां कृत्वा स्वयमेव गृहकार्याणि कृत्वा सा धनसङ्ग्रहम् अकरोत्। माधवः तां सदैव अवदत्, अयि, किमर्थम् एवं परिश्रमं करोषि? स्वसुखार्थं भवती कदापि धनं न उपयोजयति। मम सर्वे परिश्रमाः युष्माकं सर्वेषां सुखार्थमेव इति। सा ईषद् हसित्वा वदति स्म, 'मम चिन्ता न कर्तव्या। अस्माभिः भविष्यत्कालः चिन्तनीयः। कन्यायाः विवाहः, पुत्रस्य शिक्षणम्, आवयोः वार्धक्यं वा एतद् सर्वं धनम् अपेक्षते। धनेन विना किमपि न भविष्यति।' भार्यायाः दूरदर्शिताम् अवगम्य माधवः निरुत्तरः अभवत्।

कालस्य गतिः अबाधिता। विशेषतः सुखदः कालः वेगेन धावति इति सत्यम्। मधुलिका विज्ञानस्नात-कोपाधिम् अधिगतवती। तस्याः विवाहस्य चिन्ता तस्य मनसि प्रविष्टा। सः वरान्वेषणम् आरब्धवान्। किन्तु वर्षद्वयं यावत् न प्राप्तः अनुरूपः वरः। कालेन गच्छता मिलिन्दः अपि अभियन्ता अभवत्। सः स्वकीयं कमपि उद्योगं कर्तुम् ऐच्छत्। तदर्थं धनम् आवश्यकम्। माधवः तं वदति स्म, 'रे मिलिन्द, नास्ति मे अधिकोषे अधिकं धनम्। आदौ मधुलिकायाः विवाहः भवतु। अनन्तरम् अवशिष्टं धनं तुभ्यं दास्यामि स्वोद्योगार्थम्। पितुः उत्तरेण मिलिन्दः हतोत्साहः असन्तुष्टः च आसीत्। विवाहस्य विचारेण मधुलिका अपि निराशा दुःखिता च। अपत्यानां नैराश्यं दृष्ट्वा माधवस्य मनः नितराम् अव्यथत। किन्तु पुनः नवोत्साहेन सः प्रयत्नान् अकरोत् ।

*१९/बी, भांगे विहारः, त्रिमूर्तिनगरम्, नागपुरम्, महाराष्ट्रम्-४४००२२

अचिरादेव तस्य आशा सफलतां गता। प्रयत्नैः यशः प्राप्तम्। मधुलिकायाः स्वप्नः पूर्णतां गतः। तस्याः विवाहः निश्चितः। अनुरूपः विद्यागुणरूपः सम्पन्नः वरः तया प्राप्तः। गृहे साक्षात् आनन्दसागरः अभवत्। सर्वत्र किमपि चैतन्यम्, उत्साहः, आनन्दः खलु अवर्तन्त। विवाहस्य सिद्धतां कर्तुं मालती बद्धपरिकरा सञ्जाता। विवाहोत्सवे किं किं करणीयम्? के के जनाः निमन्त्रयितव्याः? कानि कानि वस्त्राणि क्रेतव्यानि? कीदृशाः अलङ्काराः भवन्तु इत्यादिषु विषयेषु चर्चा कृत्वा अतीव आनन्दः अनुभूतः माधवेन सपरिवारम्। विवाहस्य कृते आवश्यकं धनम् अधिकोषे आसीदेव। अतः चिन्ता नासीत्। आवश्यक्तानुसारम् अधिकोषात् धनम् आनेतव्यम् इति मालतीमाधवयोः विचारः।

अन्येद्युः सर्वे सोत्साहम् उत्थिताः। सर्वेषु कार्येषु अनन्यसाधारणी गतिः आसीत्। माधवः सहजतया नित्यक्रमम् अनुसृत्य वार्तापत्रम् उद्घाटयत्। अनुक्षणमेव तस्य हस्तात् वार्तापत्रं गलितम्। सः वेगेन आसन्दे उपाविशत्। मालती वेगेन तमुपाधावत्। किम् अभवत्? किमस्ति अस्मिन् वार्तापत्रे? वदतु, वदतु। तस्या अधीराः प्रश्नाः। मिलिन्दः वार्तापत्रं गृहीत्वा आद्यां वार्ताम् उच्चैः अपठत्–'अधिकोषे धनस्य अपहारः। अधिकोषस्य सर्वे व्यवहाराः असत्याः। कोटिशो रूप्यकाणां दुरुपयोगः। सहस्रशः ग्राहकाः वञ्चिताः।'

एनाम् अनपेक्षितां वार्तां श्रुत्वा मालत्याः अवस्था शोचनीया अभवत्। यस्मिन् अधिकोषे माधवस्य धनमासीत् तस्य विषये आसीत् सा वार्ता। किं करणीयम्? किमिदानीं भविष्यति? मया महत् कार्पण्यं कृत्वा कणशः धनं सङ्गृहीतम्। तस्य किं भविष्यति? विविधविचारैः सा किंकर्तव्यविमूढा अभवत्। तस्याः नेत्रयोः पुरतः अन्धकारः एव आसीत्। तथापि पत्युः असहायाम् अवस्थां दृष्ट्वा सा आत्मानं स्थिरीकृत्य पतिम् अवदत्, भवान् एकवारं स्वयम् अधिकोषं गत्वा पश्यतु। कोऽपि मार्गः लभ्येत एव। एवं धैर्यं न त्याज्यम्।



माधवः कथमिव धैर्यं कृत्वा अधिकोषम् अगच्छत्। तत्र भूयान् जनसम्मर्दः आसीत्। कोलाहलः आसीत्। सर्वत्र शस्त्रधारिणः आरक्षकाः आसन्। संभ्रान्ताः ग्राहकाः समूहं कृत्वा स्थिताः आसन्। सर्वत्र किमपि वैक्लव्यम् आसीत्। धनप्राप्तेः काऽपि आशा नासीत्। सर्वां परिस्थितिं दृष्ट्वा माधवः स्वगृहं प्रत्यागतः। गृहे तु अन्धकारः एव आसीत्। नूनं वज्राघातः एव अभवत्। सम्पूर्णस्य जीवनस्य अर्जनं तस्मिन् अधिकोषे निश्चिन्तमनसा निक्षिप्तम्। किन्तु विश्वासघातः अभवत्। धनं विना कन्यायाः विवाहः कथं भवेत्? कुतः एतावत् धनं पुनः लभ्येत? कन्यायाः विवाहार्थं पुत्राय उद्योगार्थं धनं न दत्तम्। इदानीं तैलं गतं घृतमपि गतम्। कुत्र विश्वासः करणीयः? नास्ति कुत्रापि विश्वासार्हता। नास्ति कुत्रापि सुरक्षितता। अस्माकं पूर्वजाः भूमौ धनं निक्षिपन्ति स्म तदेव उचितमासीत्। एतादृशाः विचाराः तस्य मनसि वारंवारम् औदासीन्यम् अवर्धयन्। अतः मनः रमयितुं सः उद्यानम् आगतः। किन्तु अत्रापि विचाराः तमनुधावितवन्तः। चटकपरिवारं स्वनिर्मिते कोटरे सुखासीनं दृष्ट्वा दीर्घं निश्वस्य सः प्रस्थितः।

माधवः श्रान्तेन शरीरेण मनसा च गृहं प्रविष्टः। मालत्या गणेशमूर्तिः जले निक्षिप्ता आसीत्। सा पूजाकार्ये निमग्ना आसीत्। मिलिन्दः विधिज्ञं द्रष्टुं गतः आसीत्। मधुलिका शून्यमनसा गृहकार्यं नाटयन्ती आसीत्। तस्याः म्लानमुखं दृष्ट्वा माधवस्य व्यथा शतगुणिता, मनोभारः वृद्धिंगतः। रात्रौ भोजनस्य इच्छा एव नासीत् कस्यापि मनसि। परस्परं सान्त्वयद्भिः तैः सर्वैः कथञ्चित् भोजनस्य अभिनयः कृतः। रात्रौ वार्ताः श्रोतुं माधवेन दूरदर्शनयन्त्रम् उद्घाटितम्। तत्रापि अधिकोषस्य एव वार्ता। नासीत् अपराधिजनानाम् अन्वेषणे काऽपि प्रगतिः नापि धनस्य आशा। भविष्यतः कालस्य विचारेण माधवः खिन्नः अथ च श्रान्तः। अकस्मात् तस्य उरसि वेदना उद्भूता। क्षणार्धात् तस्य शरीरं स्वेदेन क्लिन्नम्। नासीत् शक्तिः किमपि वक्तुम्। महता प्रयासेन सः उक्तवान्, अयि मालति, मधुलिके, मिलिन्द अत्र आगच्छत। अयम् अहं युष्मान् सर्वान् आपृच्छे। सुखिनः भवन्तु सर्वे। इति महता कष्टेन उक्त्वा सः शान्तः रुद्धः, शरीरञ्च विरतव्यापारमभवत्।



# श्रीमच्छङ्करस्य कार्यम्

-डॉ. केशवरामः शर्मा*

**पात्रपरिचयः**



१. उमाशङ्करः - एकः शिवभक्तपण्डितः।
२. मनोरमा - उमाशङ्करस्य पत्नी।
३. करोडीमलः - एको धनिकः।
४. राकेशः - करोडीमलस्य पुत्रः।
५. भगवान् शिवः।
६. भगवती पार्वती।

**अथ प्रथमं दृश्यम्**

(नगराद्बहिरेकस्मिन् शिवमन्दिरे पण्डित उमाशंङ्करः सायंकालीनसन्ध्याङ्करोति।)

**उमाशंङ्करः**- (सन्ध्याऽनन्तरम्) हे भूतनाथ! हे शङ्कर! हे आशुतोष! हे दीनरक्षक! कन्याविवाहार्थं चिन्तितेन सर्वथानिराशेन मया भवत आराधनं कृतम्। श्वो ममाऽनुष्ठानस्यैकमासः पूर्णो भविष्यति। यथा भवद्भ्यो रोचते तस्या विवाहस्य व्यवस्था करणीया।

मयाऽयमनुष्ठानकालोऽतीवकष्टेन यापितः। यदि ममाऽऽहारविहारयोः काऽपि त्रुटिरागता सा भवता क्षन्तव्या। मम कोऽप्यन्य आश्रयो नास्ति। नागरिकाः श्रद्धाहीना निष्करुणाश्च जाताः। प्रतीयते यत्पौरोहित्यकर्मस्य काल एव गतः। पण्डिताः यत्र-तत्र तिरस्कृता भवन्ति। कोऽप्युचितदक्षिणां न ददाति। पुनश्च। रमाया विवाहार्थमधिकविलम्बो नोचितः।

केचित्जनाः ममानुष्ठानस्यऽप्युपहासं कुर्वन्ति। भवान्ममाऽवस्थां जानात्येवाऽतोऽधिकं किं वचनीयम्? हे दीनवत्सल! यथा भवतां दास उपहासपात्रं न भवेत्तथा कृत्वाऽनुगृहीतं कुरु। (प्रणम्य गच्छति।)

**पार्वती** - [शिवं प्रति] हे नाथ! असौ ब्राह्मणो भवदाश्रितोऽस्ति। अस्य कल्याणार्थं भवता किं चिन्तितम्?
[सहसा करोडीमलो मन्दिरप्राङ्गणे प्रविशति। पार्वत्याः कथनं श्रुत्वा स तूष्णीं तिष्ठति।]

**शिवः** - स्वभक्तानां साहाय्यं मम प्रथमकर्माऽस्ति। अहमस्य सम्मानरक्षामवश्यमेव करिष्यामि।

**पार्वती**- शोभनमिदम्। तर्हि किं दास्यति भवानस्मै?

**शिवः** - किं दातव्यं मया? किं पञ्चाशत्सहस्ररूप्यकाणि पर्याप्तानि भविष्यन्ति?

**पार्वती** - पर्याप्तमिदम्। कुतो दास्यति भवानेतानि रूप्यकाणि?

**शिवः** - तस्यापि व्यवस्था भविष्यति। इदानीं भवती तूष्णीं तिष्ठ।

---

* बी-५९, उत्तरी छज्जूपुरम्, मार्ग सं. -३, शाहदरा, देहली

**करोडीमलः** –[इतस्ततः पश्यति। मन्दिरे तस्य प्राङ्गणे वा कोऽपि दृष्टिगोचरो न भवति।] निश्चयेनेयं देववाण्यासीत्। उमाशंङ्करोऽस्मिन्विषये किमपि न जानाति। शोभनमापतितम्।

[श्रद्धया शिवं प्रणमति।]

[पटाक्षेपः]

**इति प्रथमं दृश्यम्।**

## अथ द्वितीयं दृश्यम्

[उमाशङ्करस्य गृहम्। सः स्वपत्न्या सह वार्तालापङ्करोति।]

**उमाशङ्करः**– अद्य मया भगवते निवेदितम्, यच्छ्वो ममानुष्ठानस्याऽन्तिमो दिवसो भविष्यति। यत्किञ्चिदप्युचितं तेन मम कन्याया विवाहार्थं दातव्यम्।

**मनोरमा**– कियद्धनं याचितं भवता? सुरेशः शोभनो वरोऽस्ति। सुशीलः सुवृत्तो राजकीयविद्यालये शिक्षकश्चास्ति। तस्याऽर्थं यौतुकमपि शोभनमेव भवेत्।

**उमाशङ्करः**– स रमाया गुणैस्सन्तुष्टोऽस्ति। तस्य जनकोऽपि यौतुकस्य विशेषाऽभिलाषी नास्ति। तेभ्यः पञ्चविंशतिसहस्ररूप्यकैरप्यलम्।

**मनोरमा**– किं त्वया भगवता एतावद्धनं याचितम् ?

**उमाशङ्करः**– स प्रभु सर्वज्ञो भक्तवत्सलश्चाऽस्ति। स स्वयमेव मम हितं जानाति।

[तत आगच्छति करोडीमलः]

**करोडीमलः**– भो उमाशङ्कर! द्वारमुद्घाटय। अहमस्मि, करोडीमलस्तव बालसखा।

**उमाशङ्करः**– [द्वारमुद्घाट्य] आगच्छतु भवान् [अन्तः प्रविश्य] श्रीमन्निशायाङ्कथमागतोऽसि? अहमेव कथं नाऽऽकारितः ?

**करोडीमलः**– त्वं चिरकालाद्दृष्टिपथं नाऽऽगतः। इदानीं कुत्र व्यस्तोऽस्ति भवान्?

**उमाशङ्करः** किं मदर्थे किमप्यनुष्ठानादि कार्यमस्ति?

**करोडीमलः**– कार्यन्तु नास्ति तथापि त्वं किङ्करोषीदानीम्?

**उमाशङ्करः**– अहं शिवाराधने तत्परोऽस्मि। श्वो ममाऽनुष्ठानस्याऽन्तिमो दिवसो भविष्यति। तदनन्तरं यदि मदर्थे कमपि कार्यमस्ति तद्ब्रूहि?

**करोडीमलः**– शिवानुष्ठानम्। कोऽस्ति तत्र यजमानः?

**उमाशङ्करः**– स्वयं जगत्पिता शिवो मम यजमानोऽस्ति।

**करोडीमलः**– [हसति] किं भगवता शिवेन त्वमनुष्ठानहेतुराहूतोऽसि?

**उमाशङ्करः**– यदा धनहीनोऽहमकर्मण्योऽतिष्ठन्तदा मया चिन्तितं यदकरणात्करणं श्रेयः। अतः शिवानुष्ठान-मारब्धम्।

**करोडीमलः** – किं शिव एव तुभ्यं दक्षिणामपि प्रदास्यति? विचित्रमिदं मन्ये स तु प्रचुरां दक्षिणां दास्यति। तदा सर्वैः पण्डितैस्तस्यैवाऽनुष्ठानं करणीयम् ।

**उमाशङ्करः**- किं त्वं ममोपहासायाऽऽगतोऽसि? श्वः किं भविष्यति, नाहं किमपि जानामि, किन्तु मम विश्वासोऽस्ति यदहं शिवकृपातो वञ्चितो न भविष्यामि।

**करोडीमलः**- अस्तु। यद्यहं तुभ्यमेतदर्थं दशसहस्ररूप्यकाणीदानीमेव ददामि, किं त्वं सन्तुष्टो भविष्यसि?

**उमाशङ्करः**-अहं सर्वभावेन सन्तुष्टोऽस्मि। मन्ये च यदियं साहाय्यमपि तस्यैव भगवतः प्रेरणयाऽस्ति।

**करोडीमलः** - [रूप्यकाणि ददाति] इदानीं श्वो यत्किमपि शिवो दास्यति तन्मम भविष्यति।

**उमाशङ्करः**- अहं स्वीकरोमीमं समयम्।

**करोडीमलः**- श्वो मन्दिरे मेलनं भविष्यति। [स्वगृहं गच्छति]

**उमाशङ्करः**- [मनोरमासमीपं गत्वा] शोभनमापतितम्। लब्धा मया कालात्पूर्वमेव दक्षिणा।

**मनोरमा**- मया सर्वं श्रुतमस्ति। दशसहस्रेण कार्यं न भविष्यति। करोतु भवानपरमप्येकमनुष्ठानम्।

**उमाशङ्करः**- यथा शिवेच्छा भविष्यति। अहमतीव प्रसन्नोऽस्मि।

**[ पटाक्षेपः ]**

**इति द्वितीयं दृश्यम् ॥**

## अथ तृतीयं दृश्यम्

[शिवमन्दिरे शिवानुष्ठानतत्परः पण्डितः करोडीमलश्च तिष्ठतः]

**उमाशङ्करः**- [अनुष्ठानस्याऽनन्तरं प्रार्थनां करोति]

**हे दयामय! दीनरक्षक! भक्तभयभञ्जकविभो!**
**हे कृपालो! लोकरक्षक! लोकपालक! हे प्रभो!**
**आशुतोष! दयालुशङ्कर! विश्वनाथ! विश्वम्भर!**
**जगन्नियन्तः! विपद्धर्तः! जगन्नाथ! दिगम्बर!**
**समाप्तं खल्वनुष्ठानं देहि भगवन्! दक्षिणाम्।**
**रमाविवाहो भवेद्येन यच्छ लक्ष्मीं ननु शुभाम् ॥**[1]

हे आशुतोष! मया यथाशक्तिर्भवतो वन्दनमर्चनं पूजनादिकं कृतम्। मम त्रुटयो भवान्क्षन्तुमर्हति। हे सर्वज्ञ! भवाञ्जनात्येव यन्मया स्वकन्याया विवाहसम्पादनार्थमेतदनुष्ठानं कृतम्। भगवन्देहि मह्यं यथोचितां दक्षिणाम्।

**करोडीमलः**- [सोत्साह इतस्ततः पश्यति] भगवन्! देहि अस्मै यद्भवतां रोचते। असावतीवदरिद्रो ब्राह्मणोऽ-स्ति। [पुन इतस्ततो धनार्थं पश्यति।]

**उमाशङ्करः**- प्रभो! किं ममैकमासस्य श्रमो व्यर्थो भविष्यति? सर्वे जनाः प्रागेव ममोपहासं कुर्वन्ति। व्यङ्ग्यवाक्यैः प्रहरन्ति च। अयं श्रेष्ठ्यपि भवतो भक्तोऽस्ति। हे शिव! तथा कुरु येन मम साहाय्यं भवेत्, श्रेष्ठिनो विश्वासोऽपि दृढो भवेत्।

**करोडीमलः**- हे विप्र! पुनः प्रार्थनां कुरु येन शिवशङ्करः कृपालुर्भवेत्।

**उमाशङ्करः**- [पुनः सस्वरो गायति]

---

१. १४ + १२ मात्रिकं स्वरचितछन्दम् ।

**हे शङ्कर! जगन्नाथ! दीनबन्धो! सुरेश्वर!**
**दीनहीनस्तवैवाऽस्मि कुरु शं मम शङ्कर!**
**तवाश्रिता वयं सर्वे आशुतोष! कृपाङ्कुरु।**
**देहि मह्यं धनं देव! त्वमेव शरणं मम॥**

हे भक्तवत्सल! मह्यं किमपि दक्षिणां यच्छ। दक्षिणाहीनमनुष्ठानं निष्फलं भवति। हे सर्वशक्तिमन्! यद्यपीदमनुष्ठानं भवते किमपि हानिर्लाभो न करिष्यति तथापि मर्यादाभङ्गोऽनुचितः। देहि भगवन्, मह्यं किमपि दक्षिणारूपेण।

**करोडीमलः**:- हे जगत्पते! यत्किञ्चिदपि भवताऽस्मै दातुं ह्यः संकल्पितं तद् देहि। यदि ममोपस्थितिस्तुभ्यं न रोचते, एषोऽहं बहिर्गच्छामि। [मन्दिराद्बहिर्गच्छति।]

**उमाशङ्करः**:- हे नाथ! मह्यं कामपि दक्षिणां देहि। मम कन्याया विवाहस्तवाऽधीनोऽस्ति। ममाऽनुष्ठानस्य निष्फलतां दृष्ट्वाऽसौ करोडीमलः किं चिन्तयिष्यति? रक्षतु प्रभुरावयोर्विश्वासम्।

**करोडीमलः**:- [पुनः प्रविश्य] लब्धं किञ्चित्, उतासौ नाम्नैव महादेवोऽस्ति? कीदृशोऽयं भक्तवत्सलो येन भवादृशस्य पण्डितस्यैकमासस्य परिश्रोऽपि निष्फलः कृतः?

**उमाशङ्करः**:- मैवं वदतु। भगवतो दानस्याऽऽदानस्य चाऽनेकप्रकाराः सन्ति। ईशो मह्यं केनापि प्रकारेण दास्यति, एतदस्ति मम दृढनिश्चयः।

**करोडीमलः**:- हे दृढनिश्चयिन्! त्वमितो गच्छ। अहमागमिष्यामि कियत्कालानन्तरम्।



[उमाशङ्करः शिवशङ्करं प्रणम्य बहिर्गच्छति।]

**करोडीमलः-** त्वममङ्गलकारी भूत्वाऽपि कीदृशश्शिवोऽसि? हे स्थाणो! त्वन्तु पाषाणमात्रमसि। हे मिथ्यावादिन्! त्वमुच्यसे आशुतोषः। त्वन्तु कथमपि सन्तुष्टो न भवसि। विप्रस्य मासैकपर्यन्तं परिश्रमो निष्फलो जातः। तेन बहुशो याचितोऽपि सन् त्वया तस्मै पञ्चपणा अपि न दत्ताः कुत्र पञ्चाशत्सहस्र-रूप्यकाणि?

लोकास्त्वयि विश्वसन्ति, त्वञ्चात्मानं लोकनाथ इति संज्ञया विज्ञापयसि। अद्य मया ज्ञातं यत्त्वमनाथोऽसि, अन्यानप्यनाथा एव कर्तुं सततं यत्नशीलोऽसि। लोकास्त्वां महादेवरूपेण नमन्ति। त्वं देवोऽपिनाऽसि। त्वयि विश्वासेनाऽहं वञ्चितोऽस्मि। हा! गतानि मे दशसहस्ररूप्यकाणि।

ह्यः पार्वत्या पृष्टः सन् त्वमकथयः 'ब्राह्मणाय कन्या-विवाहार्थं पञ्चाशत्सहस्ररूप्यकाणि दास्यामि।' अद्य तव मौनस्य किमर्थमस्ति? कदा दास्यति भवांस्तस्मै स्वसंकल्पितं धनम्? अहं त्वया दशसहस्ररूप्यकेण वञ्चितोऽस्मि। अन्यच्च, कोऽपि मम वचनेषु विश्वासो न करिष्यति, यतो हि त्वं सदैव मौनमेव धारयसि।

मम इव कोऽप्यन्यस्तव वाग्जाले न पतेत्, अतोऽहं तव लिङ्गमेव मन्दिराद्बहिर्क्षिपामि। इत्थं तव तिरस्कारेण मम यत्किञ्चित्सन्तोषो भविष्यति। [हस्ताभ्यां शिवलिङ्गं गृह्णाति। तस्य हस्तौ तत्रैव जडत्वं गतौ। आकृष्टावपि तौ तथैव पाषाणवदस्थाताम् ।]



(हस्ताभ्यां विमोचनेऽसमर्थो भूत्वा) हे शिव! कोऽस्ति ममापराधः? अहन्तु पूर्वमेव दशसहस्रेण वञ्चितोऽस्मि। मुञ्च मामहं स्वगृहं गच्छामि। [पुनरपि निष्फलो बलप्रयोगः करोति।]

**शिवः** - हे मूढ! त्वं मया सहाऽपि चातुर्यङ्करोषि। किमहमपि तवेवोद्योगपतिरस्मि? किं मया कृषिकर्म क्रियते? अहं तवेवधनाभिलाषी नास्मि, अस्म्यहं भस्मभूषणः निस्स्पृही लोकस्य नियामकश्च। अहं लोके एव धनस्यादानप्रदानं करोमि।

**करोडीमलः** - भगवन्! कीदृशमादानप्रदानम्? मम दशसहस्ररूप्यकाणि को दास्यति?

**शिवः** - मम व्यवस्थाऽस्ति यत्त्वमेव उमाशङ्कराय चत्वारिंशत्सहस्ररूप्यकाण्यपि दास्यसि। यदि त्वं शुभकर्म करोषि तर्हि तवाऽपि क्षतिपूर्ति कुतोऽपि भविष्यति।

**करोडीमलः**- हे आशुतोष! मया दशसहस्ररूप्यकाणि दत्तानि। अतोऽधिकं मम पार्श्वे न सन्ति। तदर्थमन्यस्कोऽप्यन्वेष्टव्यो भवता।

**शिवः**- धूर्त! त्वं नाम्नैव 'करोडीमलो'नाऽसि। तव सम्पत्तिः पञ्चाशत्कोटितोऽप्यधिकाऽस्ति। देहि तस्मै शेषं धनमन्यथा मोक्षो नास्ति।

**करोडीमलः**- [रुदन्] क्षमस्व भगवन्! मयेदृशी हानिः कल्पिताऽपि नासीत्। अहमन्यदपि दशसहस्ररूप्यकाणि दास्यामि। इदानीं मम हस्तयोर्मोक्षो भवेत्।



**शिवः**- मूढ! मया सहापि वाणिज्यं करोषि। यत्किञ्चिदपि धनं तव समीपेऽस्ति, तदस्ति ममाऽनुकम्पया तव भाग्याच्च। पण्डितस्तव प्रतीक्षारतो बहिस्तिष्ठति, तस्य सादरमाह्वानं कुरु। तव पुत्रोऽपि त्वामन्वेषमाण इत एव आगच्छति। स्व पुत्रं गृहं प्रेषय। यदा त्वं मम मन्दिर एव ब्राह्मणाय सर्वं धनं दास्यसि, तदैव तव हस्तयोर्मोक्षो भविष्यति।

**करोडीमलः**- हे भक्तवत्सल! मां प्रति कृपालुर्भव।

**शिवः** - पुनः पुनस्तदेव शुक इव पाठः। अस्तु। एषोऽहं तूष्णीमस्मि। यथा तुभ्यं रोचते तथा कुरु।

**करोडीमलः**- [तारस्वरेण] भो उमाशङ्कर! विप्रवर! अत्रागच्छ। यदि मम पुत्रो राकेशोऽपि समायातोऽस्ति, तमप्याह्वय।

[उभावन्तः प्रविशतः।]

**राकेशः**- तात! अत्र कथं तिष्ठसि? गृहं गच्छतु भवान्।

**करोडीमलः**- पुत्र! अहमस्य पण्डितस्य चत्वारिंशत्सहस्ररूप्यकाणि धारयामि। अस्मै धनप्रदानस्य कार्यमत्रैव सम्पन्नं भविष्यति।

**राकेशः** - कीदृशं धनम्?

**करोडीमलः** इदानीं तर्कस्याऽवकाशो नास्ति। अत्राहं स्वाधीनो नास्मि। शीघ्रं गच्छ। किं मम प्राणास्तुभ्यमभीष्टा न सन्ति? [उमाशङ्कराय] हे पूज्यप्रवर! भवानत्रैव तिष्ठतु। अहं तुभ्यं सर्वं निवेदयामि।

**राकेशः** - एषोऽहं गच्छामि, शीघ्रं सधनेनागमनाय।

[पटाक्षेपः]

**इति तृतीयं दृश्यम्।**

**इति श्रीमच्छङ्करस्य कार्यं नाम लघुनाटकम्।**



सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के वरिष्ठ-बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

## "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347–1565 )

संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की मासिक बाल पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत-चन्द्रिका"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित